# shrIkRiShNasharaNAShTakam

# શ્રીકૃષ્ણશરણાષ્ટકમ્

## Document Information

Text title : kRRiShNasharaNAShTakam 1

File name : kRRiShNasharaNAShTakam.itx

Category : aShTaka, vishhnu, krishna, vishnu, haridAsa, puShTimArgIya

Location : doc_vishhnu

Author : haridAsa

Proofread by : PSA Easwaran

Description/comments : puShTimArgIya stotraratnAkara

Latest update : May 17, 2017

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

July 22, 2023

*sanskritdocuments.org*

shrIkRiShNasharaNAShTakam

# શ્રીકૃષ્ણશરણાષ્ટકમ્

સર્વસાધનહીનસ્ય પરાધીનસ્ય સર્વતઃ ।
પાપપીનસ્ય દીનસ્ય શ્રીકૃષ્ણઃ શરણં મમ ॥ ૧॥

સંસારસુખસમ્પ્રાપ્તિસન્મુખસ્ય વિશેષતઃ ।
વહિર્મુખસ્ય સતતં શ્રીકૃષ્ણઃ શરણં મમ ॥ ૨॥

સદા વિષયકામસ્ય દેહારામસ્ય સર્વથા ।
દુષ્ટસ્વભાવવામસ્ય શ્રીકૃષ્ણઃ શરણં મમ ॥ ૩॥

સંસારસર્વદુષ્ટસ્ય ધર્મભ્રષ્ટસ્ય દુર્મતેઃ ।
લૌકિકપ્રાપ્તિકામસ્ય શ્રીકૃષ્ણઃ શરણં મમ ॥ ૪॥

વિસ્મૃતસ્વીયધર્મસ્ય કર્મમોહિતચેતસઃ ।
સ્વરૂપજ્ઞાનશૂન્યસ્ય શ્રીકૃષ્ણઃ શરણં મમ ॥ ૫॥

સંસારસિન્ધુમગ્નસ્ય ભગ્નભાવસ્ય દુષ્કૃતેઃ ।
દુર્ભાવલગ્નમનસઃ શ્રીકૃષ્ણઃ શરણં મમ ॥ ૬॥

વિવેકધૈર્યભક્ત્યાદિરહિતસ્ય નિરન્તરમ્ ।
વિરુદ્ધકરણાસક્તેઃ શ્રીકૃષ્ણઃ શરણં મમ ॥ ૭॥

વિષયાક્રાન્તદેહસ્ય વૈમુખ્યહૃતસન્મતેઃ ।
ઇન્દ્રિયાશ્વગૃહિતસ્ય શ્રીકૃષ્ણઃ શરણં મમ ॥ ૮॥

એતદષ્ટકપાઠેન હ્યેતદુક્તાર્થભાવનાત્ ।
નિજાચાર્યપદામ્ભોજસેવકો દૈન્યમાપ્નુયાત્ ॥ ૯॥

॥ ઇતિ હરિદાસવર્યવિરચિતં શ્રીકૃષ્ણશરણાષ્ટકં સમ્પૂર્ણમ્ ॥

Proofread by PSA Easwaran

*shrIkRiShNasharaNAShTakam*

pdf was typeset on July 22, 2023

Please send corrections to *sanskrit@cheerful.com*